# श्री दुर्गा मानस पूजा

उद्य च्चन्दन कुङ्कुमारुण पयोधाराभिराप्लाविता
नानानर्घ्य मणिप्रवाल घटितां दत्तां गृहाणाम्बिके ।
आमृष्टां सुरसुन्दरीभिरभितो हस्ताम्बुजै र्भक्ति तो मात:
सुन्दरि भक्त कल्पलतिके श्रीपादुका मादरात् ॥ १ ॥

देवेन्द्रादिभि रर्चितं सुरगणै रादाय सिंहासनं
चञ्चत्काञ्चन संचयाभि रचितं चारुप्रभा भास्वरम् ।
एत च्चम्पक केतकी परिमलं तैलं महानिर्मलं
गन्धोद्वर्तन मादरेण तरुणीदत्तं गृहाणाम्बिके ॥ २ ॥

पश्चाद्देवि गृहाण शम्भुगृहिणि श्रीसुन्दरि प्रायशो
गन्धद्रव्य समूहनिर्भरतरं धात्रीफलं निर्मलम् ।
तत्केशान् परिशोध्य कङ्कतिकया मन्दाकिनी स्त्रोतसि
स्नात्वा प्रोज्ज्वल गन्धकं भवतु हे श्रीसुन्दरि त्वन्मुदे ॥ ३ ॥

सुराधिपति कामिनीकर सरोजनाली धृतां
सचन्दन सकुङ्कुमागुरु भरेण विभ्राजिताम् ।
महा परिमलोज्ज्वलां सरसशुद्ध कस्तूरिकां
गृहाण वरदायिनि त्रिपुरसुन्दरि श्रीप्रदे ॥ ४ ॥

गन्धर्वामर किन्नरप्रियतमा संतानहस्ताम्बुज
प्रस्तारैर्धी यमाणमुत्तमतरं काश्मीरजापिञ्जरम ।
मातर्भास्वर भानुमण्डल लसत्कान्ति प्रदानोज्ज्वलं
चैतन्निर्मलमा तनोतु वसनं श्रीसुन्दरि त्वन्मुदम् ॥ ५ ॥





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

स्वर्णाकल्पित कुण्डले श्रुतियुगे हस्ताम्बुजे मुद्रिका
मध्ये सारसना नितम्बफलके मञ्जीरमङ्घ्रिद्वये ।
हारो वक्षसि कङ्कणौ क्वणरणत्कारौ करद्वन्द्वके
विन्यस्तं मुकुटं शिरस्यनुदिनं दत्तोन्मदं स्तूयताम् ॥ ६ ॥

ग्रीवायां धृतकान्तिकान्तपटलं ग्रैवेयकं सुन्दरं
सिन्दूरं विलसल्ललाट फलके सौन्दर्यमुद्राधरम् ।
राजत्कज्जल मुज्ज्वलोत्पलदल श्री मोचने लोचने
तद्दिव्यौषधि निर्मितं रचयतु श्री शाम्भवि श्रीप्रदे ॥ ७ ॥

अमन्दतरमन्दरोन्मथित दुग्धसिन्धूद्भवं
निशाकरकरोपमं त्रिपुरसुन्दरि श्रीप्रदे ।
गृहाण मुख मीक्षितुं मुकुर बिम्बमाविद्रुमै
र्विनिर्मितमघच्छिदे रतिकराम्बुज स्थायिनम् ॥ ८ ॥

कस्तूरीद्रव चन्दनागुरु सुधाधाराभि राप्लावितं
चञ्च च्चम्पक पाटलादि सुरभिद्रव्यैः सुगन्धी कृतम् ।
देवस्त्रीगण मस्तक स्थितमहारत्नादि कुम्भव्रजै
रम्भः शाम्भवि संभ्रमेण विमलं दत्तं गृहाणाम्बिके ॥ ९ ॥

कह्लारोत्पलनागकेसर सरोजाख्या वली मालती
मल्लीकैरवकेतकादिकुसुमै रक्ताश्वमारादिभिः ।
पुष्पै र्माल्यभरेण वै सुरभिणा नानारसस्त्रोतसा
ताम्राम्भोज निवासिनीं भगवतीं श्रीचण्डिकां पूजये ॥ १० ॥

मांसी गुग्गुल चन्दनागुरु रजः कर्पूर शैलेयजैर्माध्वीकै
सह कुङ्कुमैः सुरचितैः सर्पिर्भिरामिश्रितैः ।



With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

सौरभ्य स्थिति मन्दिरे मणिमये पात्रे भवेत् प्रीतये
धूपोऽयं सुरकामिनी विरचित: श्री चण्डिके त्वन्मुदे ॥ ११ ॥

घृतद्रवपरिस्फुरद्रुचिर रत्नयष्ट्यान्वितो
महा तिमिर नाशन: सुरनितम्बिनीनिर्मित: ।
सुवर्णचषक स्थित: सघनसारवत्र्यान्वित स्तव
त्रिपुरसुन्दरि स्फुरति देवि दीपा मुदे ॥ १२ ॥

जाती सौरभ निर्भरं रुचिकरं शाल्योदनं निर्मलं युक्तं
हिङ्गु मरीच जीर सुरभि द्रव्यान्वितै र्व्यञ्जनै: ।
पक्वान्नेन सपायसेन मधुना दध्याज्य सम्मिश्रितं
नैवेद्यं सुरकामिनी विरचितं श्रीचण्डिके त्वन्मुदे ॥ १३ ॥

लवङ्ग कलिकोज्ज्वलं बहुल नागवल्लीदलं
सजातिफल कोमलं सघनसार पूगीफलम् ।
सुधामधुरिमाकुलं रुचिर रत्नपात्र स्थितं
गृहाण मुखपङ्कजे स्फुरितमम्ब ताम्बूलकम् ॥ १४ ॥

शरत्प्रभव चन्द्रम:स्फुरित चन्द्रिका सुन्दरं
गलत्सुरतरङ्गिणी ललितमौक्ति काडम्बरम् ।
गृहाण नवकाञ्चनप्रभव दण्ड खण्डोज्ज्वलं
महा त्रिपुरसुन्दरि प्रकटमातपत्रं महत् ॥ १५ ॥

मातस्त्वन्मुदमा तनोतु सुभगस्त्रीभि: सदान्दोलितं
शुभ्रं चामर मिन्दुकुन्दसदृशं प्रस्वेददु:खापहम् ।
सद्योगस्त्य वसिष्ठ नारद शुक व्यासादि वाल्मीकिभि:
स्वे चित्ते क्रियमाण एव कुरुतां शर्माणि वेदध्वनि: ॥ १६ ॥





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

स्वर्गाङ्गणे वेणु मृदङ्ग शङ्ख भेरी निनादैरुपगीयमाना ।
कोलाहलैराकलिता तवास्तु विद्याधरी नृत्यकला सुखाय ॥ १७ ॥

देवि भक्ति रसभावितवृत्ते प्रीयतां यदि कुतोऽपि लभ्यते ।
तत्र लौल्यमपि सत्फलमेकं जन्म कोटिभिरपीह न लभ्यम् ॥ १८ ॥

एतैः षोडशभिः पद्यै रुपचारोप कल्पितैः ।
यः परां देवतां स्तौति स तेषां फलमाप्नुयात् ॥ १९ ॥

## इति दुर्गा मानस पूजा सम्पूर्ण

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133